पोतनभागवतम् – तेलुगुसाहित्ये तस्य सर्वोत्कृष्टस्थानञ्च
(Potana's Bagavatam and its supreme place in Telugu Literature)

Paper Presented by
Pathan Vali Saheb
Research Scholar
Dept. of Sahitya
Rashtriya Sanskrit Vidyapeetha,
Tirupati

।। श्रीः ।।

विना वेङ्कटेशं न नाथो न नाथः,
सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे! वेङ्कटेश! प्रसीद प्रसीद,
प्रियं वेङ्कटेश! प्रयच्छ प्रयच्छ ।।

नमस्सदसे सदसःपतये च। श्रीवेङ्कटेश्वरप्राच्यपरिशोधनालयेन प्रचाल्यमानत्रिदिनात्मके (20th, 21st and 22nd of June 2009) विश्व–श्रीमद्भागवतसमावेशे मया प्रस्तूयमानोंऽशः पोतनभागवतं तेलुगुसाहित्ये तस्य सर्वोत्कृष्टस्थानञ्च इति ।

उपोद्घातः

वेदाः भारतीयसंस्कृतेः अत्यन्तप्रमाणभूताः। वेदोपबृंहणमेव स्मृतयः कुर्वन्ति। अत एव महाभारते –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ।। इति ।

प्रभुसम्मितश्रुतिवाक्यात् मित्रसम्मितपुराणवाक्यमेव पण्डित–पामराणां प्रेरणादायकम्, सुपथबोधकम् अन्ते मोक्षप्रदायकञ्च भवति।

पुराणनिर्वचनम् – पुराणानि च

पुरा अपि नवं पुराणम् इति यास्कनिरुक्ते, पुरा परम्परां वष्टि पुराणं तेन वै स्मृतम् इति पद्मपुराणे च उक्तं वर्तते पुराणनिर्वचनम् । पुराणानि प्राचीनानि सन्त्यपि तेषां श्रवणेन पठनेन विचारणेन च परतत्त्वस्वरूपं भिन्नभिन्नमार्गेषु नित्यनूतनतया प्रतिभातीति सारांशः । तानि च पुराणानि अष्टादश –

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ।। इति ।

तत्र मकारवर्णादितः द्वे पुराणे मत्स्य–मार्कण्डेये । भ नाम भागवत–भविष्यपुराणे द्वे । ब्र नाम – ब्रह्म–ब्रह्मवैवर्त–ब्रह्माण्डपुराणानि **त्रीणि**। व नाम– विष्णु–वराह–वामन–वायुपुराणानि **चत्वारि**।

अ–अग्निपुराणम्, ना–नारदपुराणम्, प–पद्मपुराणम्, लिं– लिङ्गपुराणम्, ग–गरुडपुराणम् कू–कूर्मपुराणम् स्क–स्कन्दपुराणम् चेति पुराणानि अष्टादश सन्ति ।

पुराणलक्षणम्

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्च लक्षणम् ।। इति सर्वविदितमेवैतत् ।

पुराणकर्ता – भगवान् वेदव्यासः

विष्णुरंशो मुनिर्जातः सत्यवत्यां पराशरात् ।
पुराणसंहितां दद्यौ तेषां धर्मविधित्सया ।। इति प्रमाणेन,

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।

इति प्रमाणेन च पुराणकर्ता भगवान् वेदव्यासः इति सम्प्रदायवादिनः अभिप्रयन्ति । वेदान् विभज्य, भारतेतिहासं सप्तदश पुराणानि विरचय्यापि खिन्नमनस्कः वेदव्यासः नारदोपदेशेन सामान्यजनेभ्यः कथाव्याजेन भक्ति–ज्ञान–वैराग्यसम्पादनाय वेदोपनिषत्सारभूतं विष्णोः कथामृतं भागवतं व्यरचयत् । तच्च भागवतं सर्वमुनिगणसंसेव्यमानपदारविन्दः शुकमहर्षिः अध्ययनं कृत्वा मोक्षशास्त्रमिति धिया मुमुक्षवे परीक्षिते उपदिदेश ।

भागवतमाहात्म्यम्

पद्मपुराणोत्तरखण्डस्य प्रथमषडध्यायेषु भागवतमाहात्म्यम् इत्थं वर्णितमस्ति – निगमकल्पतरुगलितं फलं भागवतम् । वैकुण्ठगतं तत् नारदेन व्यासाय समर्पितम् । व्यासः शुकाय शुकमुखात् अमृतद्रवसम्मितं भागवतं भुवौ आगतम् । भागवतरसास्वाद्यमानानां परमानन्दानुभवः तथ्यम् । परीक्षिते भागवतकथाश्रवणारम्भे सुराः अमृतभाण्डेन आगत्य शुकमहर्षिं प्रार्थयामासुः भागवतकथामृतम् अस्मभ्यं दत्वा अस्माभिः आनीतम् अमृतभाण्डस्थामृतं परीक्षिते दत्वा अस्माननुगृह्णन्तु इति । शुकमहर्षिः सुराः उत्तमभक्ताः न इति मत्वा तेभ्यः भागवतकथासुधां दातुं नैच्छत् – इति कथा श्रूयते ।

अनया कथया ज्ञायते भक्तजनैकलभ्यं भागवतम् इति, तच्च अमृतात् अपि अधिकफलप्रदम् इति च । श्रीमद्भागवतकथामृतं श्रुत्वा सप्तदिनानि भक्त्या मोक्षं विन्दन्ति साधवः । वेदान्तश्रवण–गीतापारायणादिभिः च अलभ्यानि भक्ति–ज्ञान–वैराग्यानि भागवतकथामृतश्रवणेन अवश्यं लभ्यन्ते । एत एव आन्ध्रभाषायाम् आर्यैरुक्तम् –

నిగమములు వేయుఁజదివిన
సుగమంబులు కావు ముక్తి సుభగత్వంబుల్ ।
సుగమంబు భాగవతమను
నిగమంబు పఠింప ముక్తి నివసము బుధా ॥

सहस्राधिकवेदपठनेनापि मुक्तिः नैव लभ्यते किन्तु भागवतवेदपठनेन अवश्यं मुक्तिः लभ्यते इति अस्य पद्यस्यार्थः । वेदत्रयं पठितुम् अवगन्तुं वा पामरजनाः न पारयन्ति । अतः तेभ्योऽपि आत्मज्ञानसिद्धिः भक्त्या भवतु इति धिया ब्रह्मणा सूताः पुराणप्रवचनाय नियुक्ताः आसन् ।

एवं सामाजिकौन्नत्यै विकासाय च साहित्यस्य अत्यन्तप्रमुखस्थानं वरीवर्ति । विलसन्ति हि तादृशसाहित्यरचनासु रामायण–महाभारत–भागवतग्रन्थाः नानाकर्तृकाः भारतीयभाषासु । तत्र रामायणग्रन्थः कुटुम्बव्यवस्थायाः अक्षराकृतित्वेन, महाभारतं सामाजिकव्यवस्थायाः दर्पणत्वेन अथ श्रीमद्भागवतम् आध्यात्मिकचिन्तनायाः भक्तिभावनायाः धार्मिकजीवनाय च प्रतीकभूतत्वेन विद्योतते।

आन्ध्रभागवतम् – बम्मेर पोतनामात्यः

आन्ध्रदेशे सहजपण्डितबिरुदाङ्कितेन महाकविना बम्मेर पोतनार्येण व्यासविरचितं भागवतपुराणम् आन्ध्रीयेभ्यः लौकिकभाषायां **श्रीमदान्ध्रमहाभागवतम्** इति नाम्ना अनूदितम्। तच्च आन्ध्रदेशस्य प्रत्येकस्मिन् गृहे नित्यपारायणग्रन्थत्वेन पूज्यते । आबालगोपालं च भागवतकथाश्रवणे परमानन्दसम्भूताः भवन्ति।

देश–कालादयः

महाकविः श्रीबम्मेरपोतनार्यः आन्ध्रदेशे तेलङ्गाणाप्रान्ते ओरुगल्लुमण्डलस्थ **बम्मेर**ग्रामे जनिमवाप। ओरुगल्लुपत्तनस्यैव एकशिलानगरमिति चारित्रिकं प्रसिद्धं नाम विद्यते । तदेव आधुनिकनाम्नि वरंगल्लु इति व्यवह्रियते। माता– **लक्ष्मम्मा,** पिता च **केसनार्यः** । प्रौढसरस्वतीबिरुदाञ्चितः तिप्पनार्यः तस्य भ्राता।

पोतनकालश्च पञ्चदशशतकस्योत्तरार्धमिति सुप्रसिद्धचारित्रकविमर्शकाः श्रीमल्लंपल्लि सोमशेखरशर्माणः अवोचन् । अस्य महाकवेः अन्यकृतयः – वीरभद्रविजयमु, भोगिनीदण्डकमु, नारायणशतकमु इति तिस्रः सन्ति ।

पोतनभागवतशैथिल्यवृत्तान्तः

पोतनार्यः भागवतकृतिं मह्यं न समर्पितवान् इति हेतोः सर्वज्ञसिंगभूपालः तां कृतिं भूमौ निचिक्षेप इति एका कल्पिता गाथा प्रचारे वर्तते । अपरा च गाथा – 'पोतनेनैव निक्षिप्तग्रन्थोऽयं तस्य चरमदशायां बहिरुन्नीय स्वसूनवे केसनाय शिथिलसारस्वतम् अदात् इति । किन्तु भागवतग्रन्थशैथिल्ये कारणं तदानीन्तनराजकीयस्थितिगतय एव । शिथिलभागवतं च नारय–सिङ्गन–गङ्गनमहाभागैः पूरितम्' – इति ।

पोतनभागवतस्य सर्वोत्कृष्टत्वम्

श्रीमदान्ध्रमहाभागवतं कवित्रयविरचितमहाभारतम् इव स्वतन्त्रानुवादेन श्रीनाथविरचित–नैषधमहाकाव्यम् इव भावानुवादेन च भूषितं विद्यते । सरलशैल्या, प्रसन्नगम्भीरेण इव माधुर्यगुणोपेतेन सहजालङ्कारैः शोभितत्वेन पण्डितपामरजनरञ्जकत्वेन च युक्तत्वात् सन्त्यपि इतरकृतानि भागवतरचनानि पोतनार्यकृतं भागवतम् आन्ध्रसाहित्ये सर्वोत्कृष्टं स्थानं भजते । पोतनार्यः व्यासभागवतं यथातथानुवादं

नाकरोत् औचित्यानुसारं सङ्क्षिप्तभागं विस्तृतवर्णनेन भूषितमकरोत्, यतः तत्र भक्त्यावेश एव निदानभूतः। तद्यथा – व्यासभारते प्रह्लादचरित्रे हिरण्यकशिपुः स्वपुत्रं प्रेम्णा –

प्रह्लाद उच्यतां तात स्वधीतं किञ्चिदुत्तमम् ।
कालेनैतावताऽऽयुष्मान् यदशिक्षद्गुरोर्भवान् ।। (व्यासभागवतम् ७.५.२२)

इति पृच्छति सति प्रह्लादस्य उत्तरं द्वयोः श्लोकयोः एव दृश्यते –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।। (व्यासभागवतम् ७.५.२३)

इति पुंसार्पिता विष्णौ भक्तिश्चेन्नलक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ।। (व्यासभागवतम् ७.५.२४) इति ।

अत्र पोतनामात्येन भावावेशात् नव पद्यानि कल्पितानि । ते च – सप्तमस्कन्धस्य १६३ त्रिषष्ट्युत्तर–एकशतपद्यादारभ्य एकसप्तत्युत्तर–एकशतपर्यन्तम् क्रमेण –

1. చోద్యంబయ్యెడు నింతకామరిగెన్ ... 163
2. నిన్నున్ మెచ్చరు నీతిపాఠమహిమన్నీతోడిదైత్యార్భకుల్ ... 164
3. అనినం గన్న తండ్రికిం బ్రియనందనుండైన ప్రహ్లాదుండిట్లనియె.. 165
4. చదివించిరి నను గురువులు 166
5. తను హృద్భూషలసఖ్యమున్ శ్రవణమున్ దాసత్వమున్ 167
6. అంధేందూదయముల్ 168
7. కమలాక్షునర్చించు కరములు కరములు 169
8. కంజాక్షునకుఁ గాని కాయంబు కాయమే 170
9. సంసారజీమూత సంఘంబు విచ్చునే ? చక్రి దాస్యప్రభంజనములేక . 171

इति । अपि च गुरुसु प्रह्लादः भवतः ईदृशविपरीतबुद्धिः परबोधितो वा स्वकल्पितो वा इति पृष्टे सति तदा सः –

మందారమకరందమాధుర్యమునఁ దేలు
మధుపంబు వోవునే మదనములకు
నిర్మలమందాకినీ వీచికలఁ దూఁగు
రాయంచ సనునే తరంగిణులకు

इत्येवंरूपेण मम भक्तिः विष्णौ स्वाभाविकी इति सूचयति ।

అలవైకుంఠపురంబులో నగరిలో నామూలసౌధంబు దా
పలమందారవనాంతరామృతసరఃప్రాంతేందు కాంతోపలో
త్పలపర్యంక రమావినోదియగు నాపన్న ప్రసన్నుండు వి
హ్వలనాగేంద్రము పాహి పాహం యనఁగుయ్యాలించి సంరంభియై 8.95

गजेन्द्रस्य पाहि मां पाहि माम् इति आर्तनादं श्रुत्वा रमया रममाणः आपन्नप्रसन्नः ततः पर्यङ्कात् प्रस्थितः तदा –

సిరికింజెప్పడు శంఖచక్రయుగముంజేదోయి సంధింపఁడే
పరివారంబును జీరడభ్రగపతిం బన్నిండాకర్ణికాం
తర ధమ్మిల్లముఁ జక్కనొత్తఁడు వివాదప్రోద్ధతశ్రీకుచో
పరి చేలాంచలమైన వీడఁడు గజప్రాణావనోత్సాహియై. 8.96

अस्मिन् श्लोके गजप्राणत्राणार्थं संरम्भेण प्रस्थितः श्रीमहाविष्णुः लक्ष्मीं प्रति किमपि न गदति दीनप्राणावनाय शङ्खचक्रे न धारति सैन्यं च नाह्वयति अपि च रतिक्रीडायां सम्मिलितकुचोपरिवस्त्रमपि न जहातीति आश्रितजनरक्षणे विष्णोः साहजिकं चित्रं प्रदर्शयति पोतनार्यः आन्ध्रमहाभागवते ।

रुक्मिणीदेव्या प्रेषितसन्देशकथनानन्तरं ब्राह्मणः तस्याः सौन्दर्यातिशयं कृष्णं विज्ञापयति तत्र पोतनार्येण प्रयुक्तः पुनरुक्तवदाभासालङ्कारः रमणीयः विद्यते –

పల్లవవైభవాస్పదములు పదములు
కనకరంభా తిరస్కారులూరు
లరుణప్రభామనోహరములు కరములు
కంబు సౌందర్యమంగళము గళము
మహిత భావాభావమధ్యంబు మధ్యంబు 10.1710

इत्येवंरूपेण भवता परिणेतुं सा योग्या, अवश्यं भवतः विवाहो तया सह भविष्यति शत्रुं जय इत्यादि विनिवेदयति ।

1. ఏ నీ గుణములు కర్ణేంద్రియములు సోక - 1701
2. పోఁడను బ్రాహ్మణుండు యదుపుంగవువీటికి - 1726
3. కనియెన్ రుక్మిణి చంద్రమండల ముఖుం 1747

पोतनभागवते अद्वैतपरः श्लोकः सहृदयजिह्वाग्रे आबालवृद्धं सदा तिष्ठति । तद्यथा गजेन्द्रस्तुतौ–

ఎవ్వనిచే జనించు జగమెవ్వని లోపలనుండు లీనమై
యెవ్వని యందుడిందు బరమేశ్వరుఁడెవ్వఁడు మూలకారణం
బెవ్వఁడనాది మధ్యలయుఁడెవ్వఁడు సర్వముఁదానయైనవాఁ
డెవ్వఁడు వాని నాత్మభవునీశ్వరునే శరణంబు వేఁడెదన్ ॥ 7. 73 ॥

చేతులారంగ శివుని పూజింపడేఁని
నోరునొవ్వంగ హరి కీర్తి నుడువడేఁని
దయయు సత్యంబు లోను గాదలంపడేని
కలుగనేటికిన్ తల్లుల కడుపుచేటు. ॥ 7. 74 ॥

इमे द्वे पद्ये बाल्ये मे पितृपादाः अबोधयन् ।

आन्ध्रभाषायां श्रीपादकृष्णमूर्तिशास्त्रिणा कृष्णभागवतम् जनमञ्चिशेषाद्रिशर्मणा विरचितं ताण्डवकृष्णभागवतम् च विराजेते भागवतग्रन्थौ । भागवतस्य आन्ध्रदेशस्थख्यातिः व्याप्तिश्च यादृशी दृश्यते न तादृशी अन्यदेशेषु ।

परमभक्तः सहजपण्डिताग्रसरः पोतनार्यः । तस्य भागवतानुवादे भक्त्यावेशः अनितरतुल्यः शब्दालङ्कार–अर्थालङ्कारसन्निवेशः, रसचित्रणं, पात्रचित्रणं माधुर्यादिगुणविन्यासः संस्कृतान्ध्र–पदविन्यासे पदलालित्यम् इत्यादि बहवो गुणाः श्रीमदान्ध्रमहाभागवतस्य शोभां जनयन्ति ।

एवञ्च आन्ध्रसाहित्ये पोतनार्यविरचितं श्रीमदान्ध्रमहाभागवतं सर्वोत्कृष्टस्थानं च भजति इत्यत्र नास्ति कस्यापि विप्रतिपत्तिः ।। इति शम् ।।

मह्यमेतादृशमवकाशं कल्पितवद्भ्यः सर्वेभ्यश्च धन्यवादान् वितरन् विरमामि ।।

इत्थम्
बुधजनाश्रयः

(पठान् वलि साहेब्)

Reference Books :

1. **శ్రీవేదవ్యాసమహర్షికృత శ్రీమద్భాగవతము దశమస్కంధము - 3,** తెనుగు అనువాదము - శ్రీ జన్నాభట్ల వాసుదేవశాస్త్రి, ముద్రణమ్ - శ్రీ గౌడీయమఠము, గుంటూరు - 3, 1983.

2. **శ్రీవేదవ్యాసమహర్షిప్రణీతమ్ శ్రీమద్భాగవతమ్** (దశమస్కంధః - పూర్వభాగః) శ్రీవీరరాఘవీయ వ్యాఖ్యోపేతమ్, ప్రకాశకః శ్రీత్రిదణ్డి శ్రీమన్నారాయణరామానుజజీయర్ స్వామీ, ముద్రణమ్ విజయ ముద్రణశాలా, చిత్తూర్ - 1976.

3. **పూర్వగాథాలహరి,** వేలూరి శ్రీనివాసరావు, వెంకట్రామ అండ్ కో- ఏలూరు. - 2005.

४. **संस्कृतसाहित्येतिहासः,** लेखकः - आचार्य रामचन्द्रमिश्रः, प्रकाशकः - चौखम्बा विद्यभवन (भारतीयसंस्कृति एवं साहित्य के प्रकाशक तथा वितरक) चौक (बनारस स्टेट बैंक भवन के पीछे), पो०बा०नं० १०६९, वाराणसी २२१००१, फोन : ४२०४०४.

(Paper Presented in International Conference on SRIMAD BHAGAVATAM at SVORI, Tirupati during 20-22 June 2009)